# Shri Surasuranandacharyavirachita Shrivaishnavadinacharya

# श्रीसुरसुरानन्दाचार्यविरचिता श्रीवैष्णवदिनचर्या

## Document Information

Text title : Shri Surasuranandacharyavirachita Shrivaishnavadinacharya

File name : vaiShNavadinacharyA.itx

Category : vishhnu, rAmAnanda, advice, upadesha, raama

Location : doc_vishhnu

Author : surasurAnandAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampraday Dig-Darshan

Latest update : November 11, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 11, 2023

*sanskritdocuments.org*

# श्रीसुरसुरानन्दाचार्यविरचिता श्रीवैष्णवदिनचर्या

प्रणम्य भाष्यकृद्रामानन्दाचार्यं च राघवम् ।
वैष्णवदिनचर्यां हि कल्याणीं बोधयाम्यहम् ॥ १॥

स्नानसन्ध्यादिकं कार्यं स्तुत्वा प्रातर्हि राघवम् ।
जप्यः श्रीराममन्त्रश्च कर्तव्यं रामपूजनम् ॥ २॥

ऊर्ध्वपुण्ड्रं सदा कार्यं श्रीयुतं हि मुमुक्षुभिः ।
ग्रीवायां तुलसीमालाद्वयं धार्यं च वैष्णवैः ॥ ३॥

वैष्णवाश्च नमस्कार्या दण्डवद् वैष्णवैः सदा ।
अग्राह्यं वैष्णवैर्नित्यं निषिद्धं चानिवेदितम् ॥ ४॥

श्रीमदानन्दभाष्यादिग्रन्थानां पठनं तथा ।
चिन्तनं वैष्णवैः कार्यं स्वाचार्याणां च पूजनम् ॥ ५॥

वैष्णवैर्मूलमन्त्रेण बोद्धव्यमर्थपञ्चकम् ।
कर्त्तव्या नवधा भक्तिः श्रीसीतारामचन्द्रयोः ॥ ६॥

परम्परानुसन्धेया रामभक्तैर्हि वैष्णवैः ।
द्वयमन्त्रानुसन्धानं कार्यं श्रीवैष्णवैः सदा ॥ ७॥

वासः सहैव कर्त्तव्यो द्वयनिष्ठैश्च वैष्णवैः ।
कर्त्तव्या सङ्गतिर्नैव संसारिणां तु गर्विणाम् ॥ ८॥

असात्विकाच्च लौकिकाद् वृत्तात् कार्या पृथक् स्थितिः ।
औदासीन्यं परित्याज्यं श्रीवैष्णवेषु सर्वदा ॥ ९॥

मनूक्ता दश धर्माश्च पालनीयाः प्रयत्नतः ।
व्रतोत्सवौ च कर्त्तव्यौ वैष्णवौ वैष्णवैर्मुदा ॥ १०॥

दृष्टार्थोऽननुवर्त्यो हि त्याज्यसंसारिदेहिनाम् ।
रामस्य च तदीयानां निन्दा कार्या न कर्हिचित् ॥ ११॥

स्वदोषदर्शनं कार्यं सततं वैष्णवैर्जनैः ।
स्वप्रशंसा न कर्त्तव्या श्रीवैष्णवैर्मुमुक्षुभिः ॥ १२॥

स्वस्वातन्त्र्यं निवर्त्याथ वैष्णवपरतन्त्रता ।
वैष्णवैरनुसन्धेया स्वीयाऽत्र सर्वदा जनैः ॥ १३॥

परिहारश्च कर्त्तव्यो भक्तैर्गर्वस्य सर्वथा ।
असाधूनां परित्यागः साधूनां च परिग्रहः ॥ १४॥

स्वरूपवर्धकं कार्यं सदाचार्यप्रसादनम् ।
ज्ञेयश्च परमोपायः श्रीरामः सर्वकारणम् ॥ १५॥

उपकारस्मृतिः कार्या रामस्य सकलेशतुः ।
अमोघा संस्तुतिः कार्या रामस्य परमात्मनः ॥ १६॥

श्रीरामे च तदीयेषु निष्ठा कार्या मुमुक्षुभिः ।
उपेक्षा नैव कर्त्तव्या कस्यचित् प्राणिनः खलु ॥ १७॥

श्रीरामज्ञानशून्याश्च दोषशून्या विभाव्यताम् ।
रामवृत्तं च संश्राव्य कार्यस्तेषां समादरः ॥ १८॥

निष्ठा भागवती ज्ञेया श्रीरामस्य प्रसादतः ।
प्रायश्चित्तादिना नैव सन्निष्ठा जायते खलु ॥ १९॥

निषादगृद्धवृत्तं हि प्रमाणं तत्र विद्यते ।
वैष्णवानां मुमुक्षूणामेते चार्था अपेक्षिताः ॥ २०॥

श्रीमत्सुरसुरानन्दाचार्येण निर्मिता शुभा ।
वैष्णवदिनचर्येयं भूयात् कल्याणकारिणी ॥ २१॥

इति श्रीसुरसुरानन्दाचार्यविरचिता श्रीवैष्णवदिनचर्या सम्पूर्णा ।

Encoded and proofread by Mrityunjay Pandey

*Shri Surasuranandacharyavirachita Shrivaishnavadinacharya*

pdf was typeset on November 11, 2023

Please send corrections to *sanskrit@cheerful.com*